## क्रतूक्थादिसूत्रान्ताट् ठक्। (६०/१२७०)

क्रतुविशेषवाचिभ्यः[1] उक्थादिभ्यश्च सूत्रान्ताच्च ठक् प्रत्ययो भवति तदधीते तद्वेद (४.२.५९/१२६९) [2]इत्येतस्मिन् विषये। अणोऽपवादः। अग्निष्टोममधीते वेद वा आग्निष्टोमिकः। वाजपेयिकः। उक्थादिभ्यः— औक्थिकः। लौकायतिकः। [3]सूत्रान्तात्—[4]वार्त्तिकसूत्रिकः। [5]साङ्ग्रहसूत्रिकः। सूत्रान्तादकल्पादेरिष्यते। कल्पसूत्रमधीते [6]काल्पसूत्रः। अणेव भवति। उक्थशब्दः केषुचिदेव सामसु रूढः। यज्ञायज्ञीयात् परेण यानि [7]गीयन्ते, [8]न च तान्यधीयाने [9]प्रत्यय इष्यते, [10]किं तर्हि, सामलक्षणे औक्थिक्ये वर्तमानः उक्थशब्दः प्रत्ययमुत्पादयति। [11]उक्थमधीते औक्थिकः। औक्थिक्यमधीते इत्यर्थः। औक्थिक्यशब्दाच्च प्रत्ययो न भवत्येव,[12] अनभिधानात्। विद्यालक्षणकल्पसूत्रान्तादिति वक्तव्यम् (म.भा.२.२८४)। वायसविद्यिकः। सार्पविद्यिकः। गौलक्षणिकः। आश्वलक्षणिकः। [13]मातृकल्पिकः। [14]पाराशरकल्पिकः। विद्या च नाङ्गक्षत्रधर्म[15]संसर्गत्रिपूर्वा। [16]अङ्गविद्यामधीते [17]आङ्गविद्यः। क्षात्रविद्यः। धार्मविद्यः। सांसर्गविद्यः। [18]त्रैविद्यः। आख्यानाख्यायिकेतिहासपुराणेभ्य[19]ष्ठग् वक्तव्यः (म.भा.२.२८४)। आख्यानाख्यायिकयोरर्थग्रहणम्, इतिहासपुराणयोः स्वरूपग्रहणम्। यावक्रीतिकः। [20]प्रैयङ्गविकः। [21]वासवदत्तिकः। सौमनोत्तरिकः। ऐतिहासिकः। पौराणिकः। सर्वसादेर्द्विगोश्च [22]लः (म.भा.२.२८४)। सर्ववेदः। सर्वतन्त्रः। सादेः—सवार्त्तिकः। ससङ्ग्रहः। द्विगोः— द्विवेदः[23]। [24]पञ्चव्याकरणः। अनुसूर्लक्ष्यलक्षणे [25]च (म.भा.२.२८४)। अनुसूर्नाम[26]ग्रन्थः, तमधीते [27]आनुसुकः। लाक्षिकः। लाक्षणिकः। इकन् बहुलं पदोत्तरपदात्। [28]पूर्वपदिकः। शतषष्टेः [29]षिकन् पथो बहुलम् (म.भा.२.२८४)। [30]शतपथिकः। शतपथिकी। षष्टिपथिकः। षष्टिपथिकी। बहुलग्रहणादणपि[31] भवति। [32]शातपथः। [33]षाष्टिपथः।

उक्थ। लोकायत। न्याय। न्यास। निमित्त। पुनरुक्त। [34]निरुक्त। यज्ञ। [35]चर्चा। धर्म। क्रमेतर। श्लक्ष्ण। संहिता। पद। क्रम। सङ्घात। वृत्ति। सङ्ग्रह। [36]गुणागुण। आयुर्वेद। 'सूत्रान्तादकल्पादेः' (ग.सू.८३)। 'विद्यालक्षणकल्पान्तात्' (ग.सू.८४)। 'विद्याचानङ्गक्षत्रधर्मसंसर्गत्रिपूर्वा' (ग.सू.८५)। 'आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठक्' (ग.सू.८६)। 'सर्वसादेर्द्विगोश्च लः' (ग.सू.८७)। 'अनुसूर्लक्ष्यलक्षणे च' (ग.सू.८८)। '[37]द्विपदी ज्योतिषि' (ग.सू.८९)। अनुपद। अनुकल्प। अनुगुण। 'इकन्बहुलं पदोत्तरपदात्' (ग.सू.९०)। 'शतषष्टेः षिकन् पथो बहुलम्' (ग.सू.९१)॥

## क्रमादिभ्यो वुन्। (६१/१२७१)

क्रम इत्येवमादिभ्यः शब्देभ्यः वुन् प्रत्ययो भवति तदधीते तद्वेद इत्येतस्मिन् [38]विषये। अणोऽपवादः। क्रमकः। पदकः।

क्रम। पद। [39]शिक्षा। मीमांसा। सामन्[40]॥

---

1. शब्देभ्यः इत्यधिकम् ब. क. फ. 2. इत्येतयोः फ. 3. सूत्रान्तात् च क, नास्ति फ. 4. वार्तिकः सूत्रिकः ब. 5. नास्ति फ. 6. काल्पसूत्रिः फ. 7. अधीयन्ते क. 8. न च नास्ति ह. 9. प्रत्ययो नेष्यते ह. 10. क्वचिदपि फ. 11. उक्थमधीते नास्ति फ. 12. एव नास्ति फ. 13. माताकल्पिकः क, मान्त्रकल्पिकः फ. ड. 14. पाराशरसूत्रकल्पिकः ह. 15. संसर्ग नास्ति फ. 16. अङ्गविद्यामधीते नास्ति फ. 17. आङ्गविद्यिकः क्षात्रविद्यिकः धार्मविद्यिकः सांसर्गविद्यिकः क. 18. अवयवविद्यापदवाक्यलक्षणानि अधीते इत्यधिकम् ड. 19. च इत्यधिकम् ग. 20. नास्ति ड. 21. नास्ति क. 22. लुक् अ. क. ड. ह. 23. त्रिवेदः इत्यधिकम् क. 24. नास्ति क. 25. च नास्ति क. 26. ग्रन्थः नास्ति फ. 27. अनुसुकः ह. 28. पदोत्तरपदिकः उत्तरपदिकः ब. ग. फ. ह, अन्ये तु पदोत्तरपदात् इति पदशब्दं उत्तरपदं यस्य तस्मात् इत्यर्थं व्याचक्षते तन्मते पूर्वपदिकः उत्तरपदिकः क. 29. टिकन् क. 30. शातपथिकः शातपथिकी षाष्टिपथिकः षाष्टिपथिकी क, शतपथिकी षष्टिपथिकी नास्ति फ. 31. अपि नास्ति ग. फ. 32. नास्ति फ. 33. नास्ति ड. 34. नास्ति क. 35. पर्व ह. 36. नास्ति क. ड. 37. द्विपात् क. ड. 38. अर्थे फ. ह. 39. नास्ति फ. 40. उपनिषद् इत्यधिकम् ग.